# Shri Ganesha Ashtottarashatanama Stotram

# શ્રીગણેશાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : gaNeshAShTottarashatanAmastotram 1

File name : gaNeshAShTottarashatanAmastotram.itx

Category : aShTottarashatanAma, ganesha, stotra, mudgalapurANa

Location : doc_ganesha

Author : Traditional

Transliterated by : PSA Easwaran

Proofread by : Karthik Chandan.P, Amith K Nagaraj, PSA Easwaran

Description-comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 26 | 5.26. 33-55|| See corresponding nAmAvalI.

Latest update : August 1, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

Shri Ganesha Ashtottarashatanama Stotram

# શ્રીગણેશાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
યમ ઉવાચ ।
મન્દારમાલાશમિકાષ્ઠજા ચ યસ્યૈવ દેહે ભવતિ પ્રમાણમ્ ।
પુષ્પં તયોઃ પત્રયુતં ચ શૂરાઃ સન્ત્યજ્ય દૂરં ચરત પ્રભીતાઃ ॥ ૩૩ ॥

દૂર્વાયુતં વિઘ્નહરસ્ય ગાથાં સઙ્ગાયમાનં યદિ પાપયુક્તમ્ ।
પૂજાદિકારં ગણનાયકસ્ય સન્ત્યજ્ય દૂરં ચરત પ્રભીતાઃ ॥ ૩૪ ॥

(અષ્ટોત્તરશતનામસ્તોત્રં પ્રારભ્યતે)
ૐ ગણેશ હેરમ્બ ગજાનનેતિ મહોદર સ્વાનુભવપ્રકાશિન્ ।
વરિષ્ઠ સિદ્ધિપ્રિય બુદ્ધિનાથ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૫ ॥

અનેકવિઘ્નાન્તક વક્રતુણ્ડ સ્વસંજ્ઞવાસિંશ્ચ ચતુર્ભુજેતિ ।
કવીશ દેવાન્તકનાશકારિન્ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૬ ॥

મહેશસૂનો ગજદૈત્યશત્રો વરેણ્યસૂનો વિકટ ત્રિનેત્ર ।
પરેશ ધરણીધર એકદન્ત વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૭ ॥ ધરણીધર var પૃથ્વીધર

પ્રમોદમોદેતિ નરાન્તકારે ષડૂર્મિહન્તર્ગજકર્ણ ઢુણ્ઢે ।
દ્વન્દ્વારિસિન્ધો સ્થિરભાવકારિન્ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૮ ॥

વિનાયક જ્ઞાનવિઘાતશત્રો પરાશરસ્યાત્મજ વિષ્ણુપુત્ર ।
અનાદિપૂજ્યાખુગ સર્વપૂજ્ય વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૩૯ ॥

વિધેર્જ લમ્બોદર ધૂમ્રવર્ણ મયૂરપાલેતિ મયૂરવાહિન્ । વિધેર્જ var વૈરિઞ્ચ્ય
સુરાસુરૈઃ સેવિતપાદપદ્મ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૦ ॥

વરિન્ મહાખુધ્વજ શૂર્પકર્ણ શિવાજ સિંહસ્થ અનન્તવાહ ।
દિતૌજ વિઘ્નેશ્વર શેષનાભે વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૧ ॥

અણોરણીયન્ મહતો મહીયન્ રવેર્જ યોગેશ વરિષ્ઠરાજ ।

નિધીશ મન્ત્રેશ ચ શેષપુત્ર વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૨॥

વરપ્રદાતર્હ્યદિતેશ્ચ સૂનો પરાશરજ્ઞાનદ તારવક્ત્ર । પરાશરજ્ઞાનદ var પરાત્પર, જ્ઞાનદ
ગુહાગ્રજ બ્રહ્મપ પાર્શ્વપુત્ર વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૩॥

સિન્ધોશ્ચ શત્રો પરશુપ્રપાણે શમીશ પુષ્પપ્રિય વિઘ્નહારિન્ ।
દૂર્વાભરૈરર્ચિત દેવદેવ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૪॥

ધિયઃ પ્રદાતશ્ચ શમીપ્રિયેતિ સુસિદ્ધિદાતશ્ચ સુશાન્તિદાતઃ ।
અમેયમાયામિતવિક્રમેતિ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૫॥

દ્વિધા ચતુર્થીપ્રિય કશ્યપાજ્જ ધનપ્રદ જ્ઞાનપ્રદ પ્રકાશ ।
ચિન્તામણે ચિત્તવિહારકારિન્ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૬॥

યમસ્ય શત્રો અભિમાનશત્રો વિધેર્જહન્તઃ કપિલસ્ય સૂનો । વિધેર્જહન્તઃ var વિઘ્નૌઘહન્તઃ
વિદેહ સ્વાનન્દ અયોગયોગ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૭॥

ગણસ્ય શત્રો કમલસ્ય શત્રો સમસ્થ ભાવજ્ઞ ચ ભાલચન્દ્ર । સમસ્થ ભાવજ્ઞ var સમસ્તભાવજ્ઞ
અનાદિમધ્યાન્તમયપ્રચારિન્ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૮॥

વિભો જગદ્રૂપ ગુણેશ ભૂમન્ પુષ્ટેઃ પતે આખુગતેતિ બોધ ।
કર્તશ્ચ પાતશ્ચ તુ સંહરેતિ વદન્તમેવં ત્યજત પ્રભીતાઃ ॥ ૪૯॥

(ફલશ્રુતિઃ)
ઇદમષ્ટોત્તરશતં નામ્નાં તત્ પ્રપઠન્તિ યે ।
શ‍ૃણ્વન્તિ તેષુ કુરુત ભીતા મા વૈ પ્રવેશનમ્ ॥ ૫૦॥

ભુક્તિમુક્તિપ્રદં ઢુણ્ઢેર્ધનધાન્યપ્રવર્ધનમ્ ।
બ્રહ્મભૂયકરં સ્તોત્રં જપતો નિત્યમાદરાત્ ॥ ૫૧॥

યત્ર કુત્ર ગણેશસ્ય ચિહ્નયુક્તાનિ વૈ ભટાઃ ।
ધામાનિ તત્ર કુરુત સમ્ભીતા મા પ્રવેશનમ્ ॥ ૫૨॥

તેન સંસ્થાપિતાઃ સર્વે સ્વસ્વકાર્યેષુ સેવકાઃ ।
કેશાદ્યાસ્તત્ર કે યૂયં વયં ભજત તં સદા ॥ ૫૩॥

એવમુક્ત્વા યમઃ સર્વાન્ કિઙ્કરાન્ મૌનમાદધે ।
યામાઃ સર્વે ગણેશાનં ભજતે ભાવસંયુતાઃ ॥ ૫૪॥

ઇદં શમીભવં પુણ્યં માહાત્મ્યં યઃ શ‍ૃણોતિ ચેત્ ।
પઠતિ સિદ્ધિદં તસ્ય મન્દારસ્ય ભવિષ્યતિ ॥ ૫૫॥

ઓમિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે
મહાપુરાણે પઞ્ચમે ખણ્ડે લમ્બોદરચરિતે શમીમન્દારસ્પર્શ-
મહિમાવર્ણનં નામ ષડ્વિંશતિતમોઽધ્યાયાન્તર્ગતં યમકૃતં
શ્રીગણેશાષ્ટોત્તરશતનામસ્તોત્રં સમાપ્તમ્ ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૨૬ । ૫.૨૬। ૩૩-૫૫॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 26 . 5.26. 33-55..

Proofread by Karthik Chandan.P, Amith K Nagaraj, PSA Easwaran

---

*Shri Ganesha Ashtottarashatanama Stotram*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*